॥ अजपाजप॥

श्रीगणेशायनमः॥मयिपूर्वेद्युःसुर्योदयादारभ्यअद्यसुर्योदयपर्यंतं
जातंषट्शतोत्तरेकविंशतिसहस्रसंख्याकंअजपागायत्रीजपंत
त्तद्देवताभ्यःयथाभागाःसमर्पयामि॥मूलाधारेश्रीगणेशायषट्श
तंसमर्पयामि॥लिंगेप्रजापतयेषट्सहस्रंसमर्पयामि॥नाभौगरुडपयेषट्स
हस्रंसमर्पयामि॥हृदिपिनाकिनेषट्सहस्रंसमर्पयामि॥कंठेजीवात्मनेसहस्रंसमर्पयामि॥भ्रू
मध्येश्रीगुरवेसहस्रंब्रह्मरंध्रेपरमात्मनेसहस्रं॥इत्येवंयथाभाग
रांतत्तद्देवताभ्यःसमर्पयेत्॥अजपानामगायत्रीयोगिनांसिद्धिदायिनि
॥यस्याःसंकल्पमात्रेणसर्वपापात्प्रमुच्यते॥हंसहंसेतिमंत्रोजीवोजपति
सर्वदा॥तंहंसंतत्वंसंयुक्तंयोवैवेदसवेदवित्॥हकारेणबहिर्यातिस
कारेणविशत्युनः॥षट्शतानिदिवारात्रौसहस्राण्येकविंशतिः॥निश्वासो
च्छ्वासरूपेणजपसंख्यामयेकृता॥तत्संकल्पनिहीनंतन्निष्फलंस्यज
पंकृतं॥संकल्पासिद्धिनाप्रोक्तानरोमोक्षंदायिनि॥तस्मात्संकल्प
येद्धीमान्हृदयेश्रद्धयान्वितः॥प्राणानायम्य॥अद्येत्यादि॥सूर्योदयमा

रभ्यश्चसुर्योदयपर्यंतंषट्शतोत्तरैकविंशतिसहस्रसंख्याकमज
पाजपंकरिष्ये॥अस्याअजपागायत्रीमंत्रस्यहंसऋषयेनमः॥
शिरसिपंचिंद्रनमः॥मुखे॥हंसदेवतायैनमः॥हृदये॥नमः श
क्तयेनमः॥पादयोः॥हंसायबीजंकं॥नमोऽभीष्टार्थेजपेवि
नियोगः॥इंसांअंगुष्ठाभ्यांनमः॥हंईंतर्जनीभ्यांनमः॥हंसुं
मध्यमाभ्यांनमः॥हंसैंअनामिकाभ्यांनमः॥हंसौंकनिष्ठिकाभ्यां
॥हंसः करतलकरपृष्ठाभ्यांनमः॥एवंहृदयादि॥अक्षध्या
नं॥गमागमस्थंगमनादिशून्यंचिद्रूपदीपंतिमिरांतकारूपस्या
मिनेसर्वजंतूनरस्थंनमाईसंपरमात्मरूपं॥हंसहंसायवि
द्महेसोऽहंसायधीमहि॥तन्नोहंसःप्रचोदयात्॥नि
रंजनायविद्महेनिराभासायधीमहि॥अनन्तस्वरूपप्रचो
दयात्॥अथसूर्योदयमारभ्यःसूर्योदयपर्यंतंषट्शतोत्त

से

रैकविंशतिसहस्रसंख्याकंअजपागायत्रीअजपंनामध्ये
नाम्यः यथाभागशःनियोजयिष्ये॥इतिअजपानपंसंपूर्ण॥